
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीगणेशायनमः श्यामंसहस्रवदनंसरसीरुहा
क्षंयुकेयूरकुंडलकिरीटविराजमानं कामाभिराममु
रमौक्तिकदामदीप्तंपीतांबरंकिमपिधामविचिंतया
मः १ संसारसागरतरिःकृतनामधेयंध्येयंसमाधिमुनि
भिःरसिकैःसदैव दैवंविनाविदधतंभ्रियमाननेभ्योवंदे
विभुंरघुपतिंकरुणैकसिंधुं २ वाल्मीकिनाप्रकविनाश
तकोटिसंख्यंरामायणंविरचितंत्रासिमोहिनाच काके
नवायुतनयेनचवापरेणकिंचित्करोतिजयदेवकविस्त्विर
त्रं ३ यदिरामपदांबुजेरतिर्यदिवाकाव्यकलासुचकौ

Acc. No. ~~3527~~ M-1622
Title - रामगीत (महाकाव्य)
सर्ग 1-6.
Author - जयदेव.
Date - ?
Subject - काव्य.
folio - 28.
Xerox - 55.

तुकं पठनीयमिदं तदौजसारुचिरं श्रीजयदेवविनिर्मि
तं ४ मालवरागेरूपकताले निर्निवनिर्कुंविनवत्कृपमः श्रु
कृपुर्तिकुंडलवानप्रमत्तः संकेतश्यालांप्रविश्यप्रदेशेमाला
धरोमालवरागराजः ५ स्मृतिवेदानुद्धारकजनतारकए
शंखसुरमनसुरबंधो जयजयरामहरे १ ध्रुपदमिदं नम
दाखंडनसेरवर धृतमंदरए संततजगदाधार २ हेमनय
नसंहारन खलदारणए धृतजगतीवरभार ३ कनककृ
श्रिपुतनुधर्षण धनकर्षणए भुवनानंदमुकुंद ४ चरणस
लिलकृतपावन वटुवामनए धृतपदनखजलधार ५

क्षत्रियविपिनविनाशन भृगुवारणए करकोदंडकुठार ६
विहितसुजनसंभावन जितरावणए रघुकुलकमलदिनेश
७ मुरबाणरविनाशक रिपुनाशकए सिंधुनिकटसंचा
र ८ जलनिधिपुलिननिवासक दिनतारकए ललितध
नदारशरीर ९ म्लेछनिधनकृतमंडन खलखंडनए कलि
ततरलकरवाल १० श्रीजयदेवनिधायक धृतसायकए
कुरुकुशलंमरणंतेषु ११ श्लोकः भूभारभंजनभवाब्धिवरि
ष्पोतमांपाहिकांतकरुणाकरदीनबंधो श्रीरामचंद्ररं
घुपुंगवरावणारेराजाधिराजरघुनंदनराघवेश ६ राव

२

णाभिभवक्लांतादेवाब्रह्मपुरोगमाः गताक्षीरनिधेस्तीरे
तुष्टुवुःकमलापतिं ७ वसंतरागेमतिमठताले त्रिखंडि
वर्ल्न्चयवकुवरमुहमंपिकचूतलतांकुरेण मन्मनूसुदावास
मनंगमूर्तिर्मत्तोमतंगभ्यवसंतरागः ८ वंदेअरविंदनयनं
बुराभ कमनीयमूर्तिधरपद्मनाभ १ कोदंडकलाकौतुकनि
धान पार्खंडखिंडनुगरुडयानं २ कल्पांतकालकरुणावता
र कल्यानहलतकमठर्णधार २ मायाविलासनानास्वरूप
कुंराभरनानजगदेकभूप ४ राजाधिराजवीरधिवीर २
णकर्मकुशालबलगुणगंभीर ५ खरदूषणदूषणदूषणं

त अंजनिजनीतगोतीनकांत ६ शास्त्रादिदेवगणपूज्यपा
द बिभ्राजमानविक्रमितविषाद ७ जयदेवभणितमति
ग्रारुवर्म विद्धातुसदाप्रणतेषुशर्म ८ कालांभोदावक्रा
त्रांमणिमयमुकुटकुंडलोद्भासिगंडकेयूरापूर्णबाहुंकमलम
सिगदाशार्ङ्गशांखवरधानं स्मेरंकुंदाभदंतंसुरगणमुनिभिर्वे
ष्टितंचक्रपाणिंस्फूर्जद्दिव्यासनस्थंहुतवहसदृशंदेवदेवंनमामि
१ इतितेषांस्तुतिंश्रुत्वाभगवान्भक्तभावनः प्रादुरासीदयो
ध्यायांकौसल्यायांशुभेदिने २ कौसल्योवाच गुर्जरी
रागेरूपकताले अमुंबालरूपंराममभिराममीडे रावणा

रित

भिभवपँक्तसुरसिद्धगणयाचितंजगतीवरपीठे १ ध्रु इंद्रनी
लाभतनुमतनुशानकोटिरूचिभिन्नमुखचंद्रमुरहारं कौस्तु
भामुक्तकंधरमरुणपाणिपद्मंबुरुहनयनमलितारं २ कं
बुनिभकंठमणिनीलचिकुरावलिविजितजलवाहसंघातं
गूढतरजत्रुमाजानुभुजदंडधरमुरसिभृगुचरणजलजातं
३ विविधमणिचित्रहेमाभरणभूषितंहेतिसंविहितजय
गानं मंदमंदस्मितंबंधुजिवाधरंपंनगामिन्नवरयानं ४
कनकमयहारमंडितललाटरुकुंदकुसुमाभरदभासं रुचि
रमरवसूत्रभरतमिंदिरासंकुलपीतकोशेयवरसुभवासं ५ सुख

दनासापुटंशीलकरुणाकरंसस्यसंकल्पमहितत्वं दानवानी
कमत्तेभपंचाननंविहितपल्लयुगदिवसकल्पं ६ कौसिला
धीशजायासिंधुशोकहरमद्भुतंविक्ष्यकौशल्या अवदिति
विदितरूपमधुनाजहिकेशवमहिमामगतशल्या ७ पठति
योध्यानमज्ञानतिमिरापहंवैहमवंत्रिजगदतिसारं भावुकं
चारुजयदेवकविनिर्मितंयातिभवसिंधुपरपारं ८ श्लो
कैकेयांभरतोजज्ञेसुमित्रायांयमौसुतौ शत्रुघ्नलक्ष्मणौना
मत्रारविन्दुनिभाननौ १ निरध्वनुर्दुन्दुभयःसमंतात्जगु
श्चगंधर्वगणाप्रवीणाः वनंसपुष्पंशारदंबुपूर्णाश्चिराधरि

४

श्रीविमलंनभश्च २ अयोध्यायांप्रतोलिषुविहरंतंरामचंद्रं
प्रतिनागरीकोक्तिः आसावरीरागेरूपकताले रामवदनम
निमंजुविलोकय शारदकोटिसुधाकिरणमिवनिर्मलंपक्षिचको
रंरोपय १ भ्रकुटिकुटिलधनुचलितंनवकुंकुमतिलकललाटं
सुहृदयंहृदयविशोककरंकरुणामयनयनविपाटं २ क्षी
रपयोनिधिवीचिविनिंदकविशदमनोहरहासं कुंदकुसुमक
मनीयलसद्दशनावलिकिरणविकासं ३ नागलतारसराग
धराधरपल्लवमजहृदिहंसं कीरमुखाकृतिधीरसुगंधसमीर
णनासावंशं ४ नानारत्नविचित्रहिरण्मयमुकुटविभास

8

मलोलं मकराकारकनककुंडलयुगचलनविभासिकपोलं ५ कंबुरुचीरतरकंठमरंदंबुजनीलविजितसितकेशं रघु कुलकैरवकाननियतमकाशककचारुविशेषं ६ मंगलमोदकरंरुचिरंसुचिरंनिजभक्तसतामनुकूलं लोकचतुर्दशपालनरक्षमपक्षविनाशमतूलं ७ श्रीजयदेवकवेरिदमुदयतिहरिवदनंस्मरतिसारं सुखयतिसाधुजनंसततंकिलशमयतिविषयविकारं ८ श्लोकः राजभूपतिपुत्रैश्चचतुर्भिर्गुणसादिभिः भुजैरिवास्त्रकुशलैर्भगवान्भक्तभावनः १ मणिचित्रकिरीटधारिणाःधनुरिषुसिविभासिपाणयः रा

५

रदिन्दुनिभाननावभुत्तनयाभूमिभुजोमहोजसः २ सुवा
हुमुखेव्यरजनीचरौघैरुपप्लुतोगाधिसुतोमहर्षिः अगादयो
ध्यांन्नसहस्त्रसंकुलांसिष्यायुतैःपूरितपार्श्वभागः २ नना
मसाकेतन्रपोमहर्षिंकृतांजलिःपादजलंपपोद्भुतं निवेदयामा
ससुतौमनोहरौप्रसन्नचितःप्रबभुवयोगवित् ४ विश्वामि
त्रःरामहस्तंप्रशंसन्नाहदाशरथिं मालवरागेरूपकताले रा
मचंद्रकरकमलमुदारं भजभजनिजममलमतुलितरुचिद
मितदनुजपरिवारं १ धृतकोदंडविसिखमणिभूषणमरुणम
नोहरवेषं भागध्येयसुचक्रविशुद्धतरविविधवरणशुभवेषं २

स्फुरदंगुलिमुखराजिविराजितममरनिकरहृततरागं मुक्ताद
लभूषितदलसंकुलसरसिजवरमिवभागं ३ वरमभिष्टम
भयंदददंभरतमाजिकलासुप्रवीणं अरिषड्वर्गमधुपमधुगंज
नमनुपममंजनहीनं ४ धर्माधिकफलनमितमहर्निशमज
शंकरमुनिगीतं कमलापाणिकमललालिततनमसुरवि
घातविनीतं ५ कपिलादिकसनकादिविसेवितमशुभशम
नमवितारं वेदपुराणसकलसंमितमिवसादितविषयविका
रं ६ चिंतामणिसुरधेनुकल्पतरुकोटिदानगुणसीलं प्राह्ल
ततज्वररोगप्रपंचहरमखिलचराचरलीलं ७ श्रीजयदेवभ

६

णितमत्तिमंजुलमधुरमनोहरगानं दिशतुसदामंगलमतु
लितमत्तिपरमानंदनिधानं ८ श्लो क्ष्मापुष्पस्यामोवि
कचविशालांभोजनयनः प्रवालोष्टेविभ्रद्रुचिरतरकोदंड
भिदुरं प्र सक्तान्पाणिभ्यामत्तिविमलमुक्ताफलरदोमहा
वीरोधीरोमनसिरघुवीरोनिवसतां १ राजन्नस्तमहर्षिभ्योरा
जंश्चिन्त्रमिदंतप राजंतेयेनरामाघावत्सनस्यालोकत्रायिनः
२ कस्तूरीकास्यामलचारुवेषंकिरीटिमाभूषितभालदेशं
श्रीरामचंद्रंनृपदेहिमस्यंसलक्ष्मणोरक्षतुयज्ञसुगं ३ क्ष्म
मापालकालोस्त्ववरनुजजयोच्छ्रितसिरःस्थितोबाहुंकृत्वागुरु

कथितजन्मांतरकथः अद्राक्षामंश्यामंजलदमिवसौमित्र्यनु
चरंसमाश्लिष्यन्राजाकुशिकतनयायाश्रुनयनः ४ हत्वा
मार्गेमार्गणेनताडिकांलोकताडिकां ययौतपोवनंरामोमह
र्षेर्गाधिजन्मनः ५ वैडुर्यद्युतिभिंदुसुंदरमुखंपूर्णेषुतूणीयु
गंमुक्ताहारकिरीटरत्नविलसत्स्वर्णंगदालंकृतं स्फूर्जद्वा
णधनुर्द्धरंरघुवरंसंवीक्ष्यसम्भ्रांतरंभैक्षंतंस्थिरतारकामुनि
वराश्चंद्रंचकोराइव ६ इतिश्रीरामगीतेसानंदरघुनंदनोना
मप्रथमःसर्गः १ रामचंद्रंसमालोक्यमुनयोवनवासिनः
योगंविस्मृत्यसहसाचक्रुस्तुतिमनेकशः १ रामकरिरा

७

गेरूपकत्ताले स्वर्णप्रभाभास्वरंभूषणंचनीलंनिचोलंसुतनौ
दधाति कौंतेयदोपांतमधिष्ठितेपिमनोन्नतारामकरीप्रतिष्ठा
२ प्रणमामिराममनुतममनुवंशकंजरविं कंदर्पकोटिस
मानसुंदररूपमादिकविं १ श्र ब्रह्माभिधानमलेपमजमद्वै
तमप्रलयं सद्रूपवंतमबाधितंचिन्मात्रमंबुशायं २ सस्यस्व
रूपममेयमक्षरमप्रपंचगतं अव्यक्तमप्रतिमंनिरीहमखंड
मीशमतं ३ स्मर्त्तिवेदहरशंखासुरप्रतिघातदक्षतरं क्षी
रोदमंथमहोगमंदरपृष्ठभागधरं ४ उत्तुंगरदशिखरेणचा
यतभूमितोलकरं प्रल्हादपालकमसुरकालकमस्तंभेदप

८

रं ५ कोदंडबाणकुठारकरतलमखिलबाहुजदं साकेतभु
पतिनंदनंससाध्विभाववहं ६ जलदाभमिंदुनिभाननंर्गर्छ
जलकपीतपटं मणिचित्रहेममकिरीटभूषितचारुभालतटं ७
इतिपठंतियोरघुवीरवर्णनमुज्वलंसुचिरं जयदेवकविनिर्मि
तमनूपमम्मितिमोदभरं ८ विराजमानेयज्ञे श्लो प्राप्य
नैऋत्यचिह्नेनाश्येनाभीभवदाशुगा मारीचप्रमुखीभीमा
ववर्षरुधिरंभ्रशं १ मारिचंताडयामाससोमदत्तेनराघवः
अस्यंतंव्याकुलोभूत्वायथौसागरसंनिधौ २ हत्वाहपाव
कास्त्रेणसुबाहुंनामराक्षसं शेषास्तमीचरास्तत्रलक्ष्मने

ननिपातिताः २ मतिचचालपुरीमिथिलामथोदशरथप्र
भवाणुगतोमुनिः गिरिशकार्मुकभंगमपेक्षुणाक्षितिभृ
ताजनकेननिमंत्रितः ४ रामचंद्रःलक्ष्मणंप्रतिआह आ
सावरीरागः जयतिविदेहनगरमनुरूपं दिशिदिशिरा
जमानचामीकररचितविविधमणियूपं १ ध्रु रुचिरल
तातरुसुमनवाटिकावापीकूपतडागं धनवलयपरिखा
धलभीनवचित्रमुदयदनुरागं २ रोषभयंकरवेषनृपति
दुर्द्धर्षमहेशपिनाकं मणिमयसौधसमूहसमुद्गमरुच्चल
चित्रादपताकं ३ तोरणनिकरकिरणसंचारविनिंदितसु

रपतिचापं आहुतिगंधसंहीतमखधूमविधुतसकलजनपा
पं ४ गजरथतुरगपदातिविघटविसंखलसमुदारं श्रृग
रसविधुसंकाशविकाशाकरुणकलशाभीततारम् ५ पंडि
तसुमतिसुसीलसुधर्मसुकर्ममनुजपरिवारं पतिपदसम
निहितनिजचित्तचतुरसुंदरपुरदारम् ६ सुखदवित्तानम
नेकतपोधनभुषितमणिमयशोभं पंकजयोनिविधिनिर्मित
मिवहततसंततमानसलोभं ७ श्रीजयदेवकवेरुदितं मि
थिलापुरगीतमशोकं मंगलमोदभरेणकरोतुसदामुदि
तजनलोकं ८ श्लो अर्भकद्वयमवेक्ष्यमैथिलःसिंहास

नेन्द्रागमलमात्तकार्मुकं गाधिनंदनमुवाचसादरंकस्यनाथ
तनयोसुलक्षणो १ अयोध्याधिपतिर्वीरोराजादशरथा
धिपः तस्यैतौतनयोभूपप्रसिद्धौरामलक्ष्मणो २ कुत्रमा
हेश्वरंचापंसर्वराजमदापहं दर्शयाशुमहाराजराघवायम
हात्मने ३ ततःदर्शितेधनुषि आदायदक्षिणेबाहोमहा
वीरोरघूत्तमः खंडयामासकोदंडमिक्षुदंडमिवद्विपः ४
रघुवरभुजदंडखंडितस्यत्रिपुरारेर्योर्धनुषःप्रचंडघोषः प्रस
रतिधरणीनभोंतरालेमुखरितदिग्वलयोजपोदयोसो ५
आगतोजामदग्न्यः असावरीरागेस्यामकताले परसु

राममवलोक्यसकोपं रघुपतिरभिजहर्षयुगबाहुविहित
बहुबाहुजलोपं १ भ्रकुटीकुटिलमरुणवदनंरदखंडित
रदपरिवारं दधतमिवपुमणिंत्रासिनंसकुजंसस्मितंछ
लमानं २ रुचिरजटामुकुटद्युतिपुंजनिभासिमनोहरबा
लं पाणिसरोजनिहितशरचापकुठारमतीवकरालं ३
एककविंशतिवारमहाविजयस्फुटसंगजलेखं भूतवि
भूषितविग्रहभागमनूपमरूपविशेषं ४ ललितममेय
बलमपरिमीतमुमापतिशिष्यमुदारं चंद्रविनादमुख
तंतुसमेनमलीनिभनयनभनिभ्मलतारं ५ शिवशिव

१०

श्रिवश्रिवमंत्रमुमंजपमानमरिक्षयहेतुं दर्भपुटिमगचर्म
पुंजभृगुवंशसमुन्नतकेतुं ६ अस्त्रशस्त्रसंभृतप्रहारण
वक्षसमाक्षवधीरं कटितटयुगलनिषंगधरं जलवाहकशब्द
गभीरं ७ श्रीजयदेवकवेरुदितं द्विजराजमहाभटरूपं
पूरयतुप्रणतजनस्यमनोरथमामनुरूपं ८ परसुरामस्याद्यं
नाद्यारभ्यकरोमिकार्मुकलतांविन्यस्यहस्तांबुजेकिंचित्पा
टलभासिलोचनयुगेतावन्नमेचोदयः यावत्सायकको
टिपाटितरिपोर्जाघालसन्मौलिषुमालामाल्यपतत्परा
गपटलैर्मामोदितामेदिनी १ भृगुसारामदेवःभृगुतिल

कनमस्तेयोगिनामग्रगन्यं त्रिपुरहरसुसिष्यंश्रीमतेर्षषि
मुर्ते वितरमयिसुदृष्टिंप्रेमपूर्णामिहर्षेजहिहिप्रबलरोषं
दोषभूतंसदैव २ परस्य रविवारेनजानक्रोधोरघूत्तमः
चकर्षसहसाभैमंभार्गवीयंशरासनं २ ततःपरशुरामः
वसंतरागेरूपकताले जयतिरामकमलाविहार जयको
शलेशकरुणावतार १ ध्रु रघुवंशकमलकाननदिनेश
कंदर्पकोटिकमनीयवेश २ कालाग्निसदृशकोपातिरेक
गंधर्वगीतपूरितविवेक २ रजनिचरप्रकरविपिनदाव
वेदांतवेदगुणभणितभाव ४ वागीशसर्वविद्याविचार

११

कंसादिवंशप्रहरभूमिभार ५ मदमोहाकालपन्नगखगे
श शरदिंदुनिभाननकुटिलकेश ६ तडिदाभवसनम
णिप्रहास कुंदाभदशनमायानिवास ७ जयदेवविन
यमतिशयमवेहि निजचरणकमलरतिमेवदेहि ८
श्लो वंदेशारदपूर्णचंद्रवदनंवंदेरूपांभोनिधिंवंदेशंभु
पिनाकखंडनकरंवंदेस्वभक्तप्रियं वंदेलक्ष्मणसंयुतंर
घुवरंभूपालचूडामणिंवंदेब्रह्मपरात्परंगुणमयंश्रेयःप्र
दंश्रीपतिं १ तस्मिन्यातेपरशुराममुनावरण्यमग्नीयपं
क्तिरथमात्मपुरोहितेन पूजांचकारमहतींविधिनाविधि

तः पप्रछसादरतरंजनकाधिराजः २ इतिश्रीरामगीते
विजितपरशुरामः द्वितीयः सर्गः २ इतिशिताध्वविनीते
नशतानंदपुरोधसा ययौजनकराजस्यमंडपंस्थानमं
डितं १ भृगुसनातननारदपर्वतात्रिशुकशौनकदत्त
मरीचः पुलहदेवललोमशकुंभजाप्रणवपूर्वकमागु
रहोऽविशन्‌ः २ शतानंदवसिष्ठाभ्यामात्तसोरघुनंदनः
तस्थौसिंहासनेदिव्येसीतयासहमंजुले २ तत्रसदेव
निकरपुरोहितः रामकरीरागेरूपकताले श्रीरामरूपम
नुत्तमंपश्यामितापहरं जलदेन्दुनीलमणिप्रभंसारदि

१२

स्तुवल्कधरं १ ॥ कनकासनेमणिमंडपेसपरिच्छदेधि
गतं जनकाधिराजसुतासमेतमशेषयोगिमतं २ च
पलाविभूषितसजलजलधरमिवमनोहरणं किंजल्क
पीतदुकूलसंकुलमिंदिरारमणं ३ केयूरकुंडलमुकु
टकंकणमुद्रिकारुचिरं मुक्ताभरदनमनंगसुंदरमंजली
सुचिरं ४ विद्याविचारणदक्षमक्षमपक्षपक्षकरं क
ल्यानभाजनमीशवंदितमरिभीतिहरं ५ आजानबा
हुमुदारविक्रममर्ककोटिरुचं निःशेषलक्षणलक्षणी
यमपास्तरोगसुचं ६ मंदारमल्लीकुंदतुलसीदामसंव

लितं श्रीवत्सचिन्हितवक्षसंस्वर्णोपवीतान्वितं ७ जय
देवभाषितमष्टपद्मंहोमिरासपरं श्रेयोद्दिशत्सखिलंज
नायसर्वलोकवरं ८ जनकंवसिष्टंप्रति श्लो कुलप
तिर्जगतामुपकारकः श्रुतिविदांप्रथमोमुनिपुंगवः विधि
सुतस्त्वमसिप्रियकांक्षयाकथयतत्प्रकरोमितदेवहि १
वसिष्टउवाच राजर्षेसर्वतत्त्वज्ञकिंनियोज्यंमयात्वयि
प्रक्षालयपदांभोजंरामस्यपरमात्मनः २ देशावरीरा
गेरूपकतालितालै सखेसानुरागे भजतरघुवीरपद
मेकं सर्वसौभाग्यसंपत्तिसंदोहकरमिंद्रशतकोटिरत्नि

१२

सेकं १ ध्रु केतुदंभोलिरेषांकुशाब्जवरचिन्हमंभोजमृदु
हारं ब्रह्मवागीशसनकादिमुनिसेवितंवेदवेदांतमतसा
रं २ नम्रदिक्पालगणमौलिमणिमालिकाकांतिविस्त
रणमतिशोभं सिद्धविघ्नेशयक्षेशकीनाशवसुतुषित
गंधर्वलत्तलोभं ३ पूरितानंदकामारिसिरसिस्फुरद्वि
मलगंगोघजलसिक्तं शापवशगौतमीपापपरिणामह
रमरुणमुधोतदत्तरिक्तं ४ अंजनीनंदनप्रेमकासारस
रसीरुहंयोगिगणयत्नं इंदिरापाणिपाथोजलालितमस
द्गुत्तपावननिपुनरत्नं ५ विपुलविस्तारसंसारसागरत

26

रणशुभकल्पहठनावं काममदमोहलोभादिकाननमहा
दहनंविधिविषमसुत्तमदावं ६ दशानादेवलोकानिद्रो
कापहंराक्षससामित्रमभिरामं कामतरुकाममणिका
मधुककोटिगुणदानपरमखिलविस्रामं ७ जयतिगं
भीरजयदेवकविभारतिपुण्यदाशमितपरितापं राज
राजेंद्ररघुवीरचरणांबुजस्मरणशुभकरणगतपापं ८
श्लो श्रुत्वामहर्षेर्वचनंमनोरमंसम्रक्ष्याल्पपादौविधि
नामहीपतिः चकारवैवाहिककर्मशोभनंश्रियोनुरूपं
स्वकुलोचितंमुदा १ लब्ध्वाधनानिसुरभीर्महिषीस्तु

रंगान्तत्ताबलाभ्यन्निविकाबसनानिभूयः हासिभ्यदा
सनिवहान्मनुवंशावीरांमापुर्नरेंद्रत्तनयापुरमात्तदाराः
२ स्फाटिकंविविधतोरणवज्रंजातरूपकलशंनभोलिहं
सौधमुकृतपताकमादराद्दाविवेशरघुवंशवर्द्धनः ३ ए
कदाशरयूकुलेविचरंतंरामंप्रतिपुरजनोक्तिः गुर्जरीरा
गेरूपकताले श्यामासुकेशीमलयद्रुमाणांमृदुल्लसत्
पल्लवतल्पजाता श्रुतेःस्वराणांदधतीविभागंतंत्रीमुखा
दक्षिणगुर्जरीया ४ तालस्याप्यपरस्यैवविचारःक्रुंदस
त्तकः चत्वारःरूपकःश्येपेप्रतिमठःविचक्षणैः ५ वि

28

रामंगतेद्रुतेद्वंद्वंगुरुश्चैकंततःपरं सुरंगतालःगंतव्यस्तारः
सुप्रतिमंटकः ६ गुर्ज्जरीरागेरूपकताले विहरतिहरिरिर
हयारयुकुले पद्मरागचामीकरमरकतबद्धविविधतरुमू
ले १ ध्रु सादरमज्जदमित्तयुवतीकुचकुंकुमपिंगलनी
रे शमदमादिसाधनविवेकवशामुनिकुलसंकुलतीरे २
विलिखितमकरनिशाकरदिनकरचंचलविशदपताके
दिव्यासनविशेषपूरिततुरीहृतदुरितपताके ३ सारस
जलकोपष्टिमरालकचक्रविजृंभितनादे पंकेरुहकेदा
रविबोधनपरिमलशमितविषादे ४ यातायाततुरंगम

१५

तंगजकरभमनुजरथयाने दिशिदिशि निजविश्रामकामव
हुविरचितरुचिरविताने ५ राजदकेलिलवंजुलतालव
ल्लीमुनिपादपच्युते भ्राजिततुंगतरंगविकासोल्लसत्तु
लसीदलपूते ६ देवगनैहैरभितःस्फुरितेप्रणवादिकमंत्रवि
चारे ध्यानपरायनसिद्धसमूहनिराकृतविषयविकारे ७
श्रीजयदेवकवेरुदितंभारयुसरिदुज्वलगानं सर्वशिरो
मणिसंभवतुप्रियदंसुखमोदनिधानं ८ श्लो आरवेटैरि
पुमोक्षणेरविरतंविष्णोविचारोत्सवैः शैलेर्यत्रजपेर्मनोरम
रुचाकीर्याचसुभूषया चित्रैर्विभ्वबलाभिरभ्वशिविका

१९

धैः सावरोदैर्बलैरामः सत्यपराक्रमैरनुदिनंप्रीतंतन्निरीषेवेन्नपं १ एकस्मिन्समयेराजागृहीत्वादर्पनंकरे अपश्यच्चाननेरोमंत्वंकर्णमूलेदद्दर्श २ प्रस्तुवान्नकुलाचार्यंवसिष्ठंमुनिपुंगवं राघवायगुरोराज्यंदेहिमस्वंतपोवनं २ कैकेय्यिवाक्यं गुर्ज्जरीरागेप्रतिमठताले श्रृणुममवचनमिदंन्नपभूषण सत्यसंधविप्राहतदुषणदेहिवरं नाथ जहिहिनधर्मपथं १ ध्रु देवासुररणमध्यसलीलं भंगमगमद्युत्तमरथकीलं २ निजकरमध्यनबध्दतसायकदत्तविजययत्नात्स्यधिनायक २ समयमवाप्यवदति

१६

विज्ञानी तस्मादिहव्रतनिंदितानुवानी ४ कुरुभरतंकोशलपुरनाथं रघुपतिरेतु विपिनमुरुगाथं ५ नतुवत्तध र्मैहाग्निकरपापं त्वामुपनयतिसहितपरितापं ६ आकर्ण्यभूपतिवचरिषुकल्पं मनसिचकारजीवसंकल्पं ७ श्रीजयदेवकविरचितरत्नं साधुजनस्यतनोतुयत्नं ८ श्लो श्रुत्वान्नृपोदशरथोवचनंमहिष्याभिन्नोबभूवहृदयेकरुणावतारः रामंमहेंद्रमणिसुंदरदेहकांतिमारुह्यकाननगमायसमादिदेश १ वैदेहिसहसानुजोरघुवरोध्वस्ताजटावल्कलंनत्वाभूपतिमादरादनुययोन

श्रृंगवेरंपुरं नानापुष्पफलैर्निषादपतिनासंमानित
श्चिन्मयोभारद्वाजमवेक्ष्यभम्यविधिनापश्यत्प्रयागं
पुनः २ गुर्ज्जरीरागेपरिमठताले पश्यपश्यरघुवीर
प्रयागं मज्जदखिलमुनिगणमत्तिरागंसीतयासहसं
ततमंतं ध्रु नीलपीतसितचित्रपताकं सुखसमूहलसि
थिलीहृतत्ताकं २ सिंहासनपरिपूजितमूले ज्ञानयो
गजपसाधनमूलं ३ वाणिजनुत्तरणी जासंगं निखि
लारतिकलुषमतिभंगं ४ उपवनवनभूषितमहिदेशं
सकलकलाकल्पितशुभवेशं ५ मनुजाकारसुरासु

१८

रन्नागं विहितनरपतितापसवरयागं ६ मुक्तिचतुर्विध
सुलभमनूपं राजमाननानामणियूपं ७ श्रीजयदेव
भणितमितिगीतं सुखयतिरामचरणमुपनीतं ८ श्लो
रामोबाणशरासनोत्कटितटेतूणीरचर्माम्बरोपूर्णेन्दुप्रति
माननोरसिरस्फुरज्जपमंडलो वन्याकार्युततेजसोजलधरश्यामोसतांवल्लभोपश्यतोमुनिबालका
वनिजपथंमीसामनोहारिणो १ इतिश्रीरामगीतेजगन्निवासप्रवासोनामतृतीयः ३ नानामुन्याश्रमंमा
र्गेपूतंकृत्वापदक्रमैः ददर्शचित्रकूटाद्रिंचित्रकूटाभि

मंडितं १ आवणिरागेरूपकताले चित्रकूटमवलोक
यसीते इत्ततन्निरवरलिखितघनमंडलमंजुलकरण
विनीते १ ध्रु मंदाकिनीप्रवाहविलंघनचंचलपक्षमरा
ले विकसितकुंदलवंगलताबलीसरसीरुहमाले २
चंपकसर्ज्जकदंबतमालहुनिद्रुमभूषितभागं वैरविही
नमतंगजसिंहमयूरमहाविषनागं ३ स्फटिकपमरा
गेंद्रनीलमणिहिरकगैरिकशोभं सीतलधीरसुगंध
समीरणमृषिजनमानसलोभं ४ गवयसरभहरिण
हरिणादनकपिकुलविपुलविहारं इंधनदलफलकु

सुमदर्भजलहेतुकमुनिसंचारं ५ शुकहारितचकोर
सारिकारवंजनकोकविरावं निर्झरसरणसलिलश्री
करभरविगतविषमतरूदावं ६ गुहनिवासकिरात
तरुणरवसविरचितविटपवितानं वनदेवीसुतालसर
सश्रुतिकृतमंगलगानं ७ श्रीजयदेवमलाकविनिर्मि
तमद्भुतभूधरगीतं हरतुमलंसकलंपठतामतिसंप्रक
रोतुविनीतं ८ श्लो एकदारघुपतिर्महागिरौसीतया
सहसिलातलेमले निद्रितोभवदुदारविक्रमः श्राकस्
नुरगमतरवगालतिः १ विददारपदांगुष्टमैन्द्रः काकः

परिस्सया इषिकास्त्रेणरामेणेक्ष्णंछिन्नंदुरत्मनः २
शरभंगसुतीक्ष्ण योगिनोरूपयावीस्परघूत्तमः पुनः
घटयोनिमुनेरनुज्ञया कृतवान्दंडककाननेस्थितिं २
असाववीरागरूपकृतालै दंडकवनमगिचारुचकासे
शारदेन्दुनिर्मलरुचिरघुपतियशासिजगत्सुविकाशे १
ध्रु निर्भयकुंभजआदिनानामुनिजनकृतसाधनयोगं
विगतवैरिमृगदस्युखगादिबलाहककदावियोगं २
गोदातरलतरंगविचित्रितरुचिरकूलकृतनगालं वि
हितनिवासविदेहसुतारघुनाथसुमित्राबालं २ खं

१२

ञ्जितकामव्राताकुलसूर्पनखाह्लनिकाधरहासं खरदू
षणरजनीचरसहितसहस्रचतुर्दशनाशं ४ रावणभ्रा
सनकनकहरिणमारीचनिपातविधानं सीताहरणवि
लापनगरुडविलोकनसद्गतिदानं ५ योजनबाहुकबं
धमहासुरमारणपावकसंगं नवधाभक्तिविवेकविचा
रणशबरीसंस्तुतिभंगं ६ नारदमुनिदर्शनविधिसंत
तरुचिरफलध्वनिगीतं पंपानिकटसमीरतनयसंवा
दविशेषमभीतं ७ श्रीजयदेवकवेरुदितं दंडकवन
चरितमनूपं यच्छतु मुक्तिपदं विमदं सुचिरं रुचिरं सु

२०

भरूपं ८ श्लो ऋष्यमूकमगमद्रघुवीरो लक्ष्मणेनस
हमारुतेन तत्रसख्यमभवत्सुग्रीवेराघवस्यहुतमग्नि
समीपं १ सप्ततालानथंभीत्वावालिनंबलशालिनं
सुग्रींवंभूपतिंचक्रेपूर्णानंदोरघूत्तमः २ सुग्रीवःस
न्निवंप्रति रामकरीरागेरूपकताले श्रीरामनाममनो
रमंभज अमृतनत्वामयंननतनोतियत्स्मरणेनज
न्मजराधिमरणभयं १ ध्रु सुकृतैःपरंमकृतेःपरंस
त्वादिभावगतं विश्रामसेकमहोगिरामजशंकराभि
मतं २ प्रल्हादनारदपुंडरीकपराशरादिनुतं संसा

२०

रसागरसुप्लवंमंत्राधिमंत्रयुतं ३ यदिभजसिहरिमपि
केवलंहरिकर्मणावचसा योगेनकिंयज्ञेनकिंअपरेन
किंतपसा ४ उद्गीतरम्यपदक्रमोपनिषत्सुगीततरं
नाबरीजटायुरजामिलादिकपापिपापहरं ५ रागादिदू
रमशेषमुनिजनसेवितंसततं लोकाभिराममभानमा
नसमंजसाचिततं ६ ब्रंह्मांडसंपुटरत्नदिवाकरमसुर
यूथभिदं जयदेवभाषितमद्भुतंभवसारभूतमिदं ७
श्लो सुग्रीवःकपिनिचयान्महीध्रतुल्यान्स्वर्णाभान्विखि
लान्दिशासुसंससर्ज सीतायैलवणपयोधिमेत्यवि

भेसुस्तदत्तरणमाकल्पय्य १ नौबवद्धनाःसयोगस्त्वागि
रिमनुत्तमं हनुमानब्धिमत्तरत्स्मरत्यारामांघ्रिपंकजं २
देवगणवरीरागेरूपकत्ताले स्फोटकाविस्तुत्तरोमहर्षो निरूढ
सन्नद्धविन्यालबाहुः प्रांशुःप्रचंडद्युतिरिन्दुगौरोदेवगणस्य
रागःकिलमल्लमूर्तिः २ लंकापुरमवलोक्यकरालंनाना
भटपरिपूरितशालं स्मरस्यविभुंवातसुतोनचकारभयं १
प्र वेदषष्टियोजनपरिमाणं बहुविधलोहयंत्रमयबाणं
२ रुचिरनिकेतनतोरणभालं भ्राजमाणमणिविरचि
तजालं २ शुभसोपानवापिकारम्यं सुरतरुभूषितवि

21

पिनमगम्यं ४ संततमसुरनिकरसंचारं कीलितलोक

पालसुरदारं ५ तुंगकनकमयसौधविकाशं मयविर

चितमरगपतिसंकाशं ६ श्रीजयदेवविनिर्मितगानं सु

खयतु साधुनिचयमनुमानं ७ तीर्त्वातीरपयोनिधिं क्ष

णमथोगत्वाश्रियःसंनिधौ दत्वा राघवमुद्रिकामपस्तुयं

कृत्वाप्रविश्यपादपं भुक्त्वाशेषतरूंनिहत्यबहुशोरक्षोग

णं लंकापुरिंदग्ध्वादाय मणिं रघूत्तममगात्श्री हनूमान्कपिः

१ इति श्रीरामगीते हनुमदागमनोनाम चतुर्थःसर्गः ४

प्रणमामि मुहुर्मुहुः कपिकरुणागारमपारविक्रमः रघुना

थमनाथवत्सलं कथयामास महीसुतादूतं ॥ १ ॥ रामंप्रतिहनु
मानाह देवगवरीरागेरुपकताले रजनीचररमणीयनिवा
सा बालचंद्रकलिकेवसमासा नाथहेरसीदतिसीताशो
कवने ॥ १ ॥ ध्रु ॥ त्वदगारगतिरतिशायदीना भूमिशायासन
सलिलविहीना २ ध्यायतितवमुखचंद्रमुदारं त्यजतिभु
जगमिवमणिमयहारं ३ भजतिनिशीथकिरणमिवज्वालं
स्पृशतिकरेणमुहुर्निजभालं ४ कलयतिमारमिवमलय
समीरं मुंचतितत्तविलोचननीरं ५ विरहतयाविदधा
तिनलासं जनयतिवह्निविषमनिश्वासं ६ रामरामरामे

त्तिसकामं वदतिविलापतयावसुयामं ७ श्रीजयदेवकवे

रिदमुदितं सुखयतुरामभक्तमतिमुदितं ८ पञ्चाशदक्षा

संख्ययाध्वतरया पाथोधिगंभीरयावर्षाकालिककालिका

निबिडश्यामाभिरामरंगैः सेनया संवीतोरघुनंदनोजलनिधेस्ती

रंतरंगाकुलंगत्वासेतुमथोचकाररुचिरंपंचाननस्थापनं

१ लक्ष्मणः रामंप्रति गुर्जरीरागेरूपकताले पश्यपश्यर

घुवीरवरसेतुं परमदुरासदरूपपयोनिधिसलिलविलंब

नहेतुं १ शैलनिवहमानीयसुमनमिवशतयोजनपरि

मानं नानाकारशरीरबलीमुखवीरविहितनिर्मानं २

वालितनयसुग्रीववायुसुतनलनी[illegible]दिविचारं रंखभ्र
जगत्तिमिनक्रचक्रकुलसंकुलमतिविस्तारं ३ अंजननी
लनीरनिधिमध्यगउज्वलरेणुविकारं छायापथमिवग
गनसमुत्पतमुडुगनमिलितमुदारं ४ ऋक्षभल्लबहुरा
जविराजितमिंदुकिरणसमरूपं लंकाविजयपत्रमर्पित
मिवविधिनाविपुलमनूपं ५ राजमानरामेश्वराजगत्तटगं
गात्तरलत्तरंगं सुरसरिदोघमपरमागतमिवभिन्नमहीध
रशृंगं ६ अद्भुतचित्रसुपात्रमिवबहुरामितसुजनपरि
तापं दर्शनसमयदूरितजनदारुणदृढभवबंधनपापं ७

23

पठतिजनः सुचिरं सुमतिर्जयदेवविनिर्मितगीतं पशुपति
नैवकदाचिदपिप्रतिबंधकसंसृतिभीतं ८ तीर्त्वापाथो
निधिं रामः ससैन्यः सचिवान्वितः उलंघ्य लंकामगमत्
सुवेलं नगसत्तमं १ लंकां रुरोध कपिभिर्बलिभिः प्रभावी
रामो रविंदनयनो रविवंशकेतुः युद्धं बभुव तुमुलं हरिरा
क्षसानां शस्त्रास्त्रमुद्गरगिरिक्षितिजप्रहारं २ आसाव
शिरागेहरूपकताले लंकापतिरवलोकयदीशं इंदीवरस
मरूचिरविलोचनमस्मिरमोचनकीशं १ ध्रु लंकाप
तिशातकोटिमंजुमुखमनुपमचिबुकलसंतं भ्रुकुटिकुटि

46

लविलासततयारतिनायकचापहसंतं २ करकोदंडलसत्
प्रभयालसमानसमस्तशरीरं शरांकसमर्पितवर्मभृतंसम
रधिवित्लंबनधीरं ३ बद्धजटामुकुटंनिबिडंरजनीचरना
शनदक्षं चारुरथस्थमुदग्रपताकमखंडितरोषविपक्षं
४ कालमिवप्रसभंखलमारणलंकादारणमेतं मातलि
सारथिनासहभातमहोप्रबलेनसमेतं ५ परिकरकटित्
नीरविभूषितमुन्नतखड्गकरालं आकंपिततुलसीदल
संकुलकुसुमकलितवनमालं ६ निष्पविमूठमतेसमरे
दशाकंठमितिप्रवदंतं प्रस्फुरिताधरपल्लवयुग्मविभासि

महावरदंतं ७ श्रीजयदेवभणितमतिमंजुलरघुवरसमर
विधानं संततमेवतनोतु श्रीवं जगतीपतिचिरनिधानं ८
यक्षांश्चदैत्यान् गिरिश्रृंगसन्निभान् महाबलान् सुदूरत्ना
त्रयोधिनः दशास्यमुग्रं घननादमूठं घटंत्रिभराश्चतथै
वरावणः १ जित्वारिपुं रघुवरो दशास्यं देवकंटकं चका
सेसुचिरंत्तभनगरे दुरिवस्फुरन् २ देवाउचुः वसंतरागे
परिमठताले जयरामचंद्रमायातिदुर रघुवंशविभुषण
मुकुटमचूर १ ध्रु अंस्मामरेंद्रगंधर्वगीत कल्यानिपुन
गुणगणविनीत २ चंडेषुपातखंडितविराध स्वर्गापवर्ग

स्मरणदागाध ३ करुणानिकेतनप्रबलरोष भवाब्धि
गम्यजितसकलदोष धराधरायनश्यामलदेह स
द्रूपबोधमयमोहगेह ५ व्यातातपत्रश्यातपत्रनेत्र कुटल
पाणितलकलितवेत्र ६ सीतापतेरघुपतेःनिरूढ विश्रा
मितसमस्तपापविमुक्त ७ जयदेवविविनिर्मितमेवराम
म कुरुतेननाथममहृदयधा ८ इतिरामस्तवंकृत्वाहर्षनि
र्भरमानसाः देवानभसियानस्थाववर्षुःकुसुमाचयं
९ कृत्वाविभीषणमशेषनिशाचरेशंलंकापुरेसुरभ
टैरुपशोभमानं अग्नाविरूढधरणीतनयासमेतो

योध्यांययोरघुपतिः किलपुष्पकेन २ इतिश्रीरामगी
तेलंकाविजयोनामपंचमः सर्गः ५ दर्शयन्काननेभ्र
योनागान्नाशितकल्मषान् भरद्वाजं विलोक्याथमा
पसाकेतकं हरिः १ पौरादयः गुर्ज्जरीरागेरूपकताले
पश्यतरामचंद्रमतिशोभं विधिहरिहराद्दिनाकपतिमुनि
गणमानसलोभं १ ध्रु शक्रनीलसंनिभशरीरमुरसु
कृजविद्रुमहारं वामभागसीतापरिभूषितमनुगतहरि
परिवारं २ भानुसमानविमानमध्यगतमनुजसहित
मसुरघ्नं चंडविस्फुरितकोदंडविनाशितसकलचराचरवि

50

२६

घ्रं ३ भरतालिंगनगुरुपदांबुजप्रणतिविकंपितभाले
द्विजजनकरणविधानपरस्परपृछितवचनरसाले ४
मातृभवनकृतगमनमनिंदितमणिमयपीठनिवासे
चामरयुगलसीतातपवारणमंडितमुज्वलहासे ५ हंस
दुकूलपुंजमुकुरप्रभयाप्रतिभासकपोले निजजनमुप
रिकृपामयस्तभ्भकराक्षनिवेशनलोलं ६ बंदिवेदधरवे
दचतुष्टयविहितविजयगुणगाथं कनकरत्नमयवृष्टि
विशेषकृताखिललोकसनाथं ७ श्रीजयदेवविनिर्मि
तमतिशायरघुपतिचरितमनूपं हरिचरणस्मरणस्यज

नस्यतनोतुसिवंस्यनुरूपं ८ निजसरसिजनेत्रैःपायथि
त्वासमस्तंजननिकरमुनिंद्रैर्जानकीपूर्णपार्श्वः रघुपतिर
थसेतेतल्पमध्येमनोज्ञेविरा़दरुचिरवर्णेस्वर्णसौधेसुखे
न १ प्रातःकालेवैतालिकाः भैरवीरागेयतिताले जय
हिरण्यनमरविंदविलोचनभवमोचनखगकेतो करुणा
र्द्रायपूरितनयनविलोकयमंगलहेतो १ ध्रु उदयतिभा
नुरयंविलयंविधुनासममेतितमिस्रं दधतिनभोरुणता
मरुणेनवसुवसरोजनमिस्रं २ विकसितपद्मवनंसक
लंविहगाधिवदंतिनिनादं हंसविरावविबोधितचक्रनि

-प्यगतसर्वविषादं ३ दीपसिखाविमुक्ततराकनिवस
मुपैतिविशाला सीदंतिकुमुदमुलूकततीप्रतिगछ
तिलयमुडुमाला ४ कर्षतिभंरवलकेगजतायुगॅविभा भाग
जितनिद्रा नमतिमहीयसभाभिमुखंतवराघवहुरिद
रिद्रा ५ गायतिसामखिलामखिलाम्रषिराजिरखं
डितवीना न्रपतिदेववधुरूचिरायुतभावभरेणनवी
ना ६ सीतलमंदसुगंधसमीरगलितकुसुमावलिरेषा
पठतिपरस्परमेवबटुःश्रुतिपाठमवारितवेषा ७ श्री
कविराजसिरोमणिदामलसज्जयदेवविगीतं मोद

भरंसुजनस्यतनोतुकरोतुसुनितविनीतं ८ यंध्यात्वा
सकलदेवदेवमुनयोगच्छंतिसायुज्यकंमोक्षंस्तोत्रमुपै
तियत्रवचनंसंकीर्त्यमानंसततं यन्नामस्मरणान्नरो
खिलमघंतीर्त्वाविमुक्तोभवेत्तंरामंप्रणमामिनित्यम
मलंसूक्ष्मंप्रकृत्याःपरं १ श्रीमद्विदेहनृपदेशललाटधिवा
सोभिःशेषभूमिपतिमंडलभावनीयः एतत्प्रकारवतवीररसप्र
धानंकाव्यंकविप्रकरमौलिविभूषणंसत् २ श्रीमद्रामायणक्षीर
सागरान्मंदरोपमः जयदेवोरामगीतरत्नमालांमुदाकरोत् ३ इ
तिश्रीरामगीतेमहाकाव्येजयदेवकृतेरामराज्याभिषेकोपष्टः स

समाप्त

[OrderDescription]
,CREATED=05.10.20 14:29
,TRANSFERRED=2020/10/05 at 14:36:38
,PAGES=55
,TYPE=STD
,NAME=S0003860
,Book Name=M-1622-RAMGEET
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,